**<u>प्रतिवेदनम्</u>**

# षोडशं विश्वसंस्कृतसम्मेलनम्

**राधावल्लभः त्रिपाठी**

थाईभाषायां क्रुङ्थेप (देवनगरी) इति अभिधीयमाने विश्वविश्रुते वैङ्काकनगरे षोडशं विश्वसंस्कृतसम्मेलनं अन्ताराष्ट्रियसंस्कृतसमवायस्य शिल्पाकरविश्वविद्यालयान्तर्वर्तिनः संस्कृताध्ययनकेन्द्रस्य च संयुक्ते तत्त्वावधाने एषमो जूनमासस्य अष्टाविंशतितमात् दिनाङ्कादारभ्य जुलाईमासस्य द्वितीयं दिनं यावदायोजितम्। अस्मिन् सम्मेलने चतुर्विंशति मुख्यसत्राणि सप्त च उपसत्राणि समायोजितानि।

भारतशासनविदेशमन्त्री सुषमास्वराजवर्या स्वकीये उद्घाटनभाषणे प्रोवाच –

“वेदान्तस्य भाषा संस्कृतम्। योगस्य भाषा संस्कृतम्। आयुर्वेदस्य भाषा संस्कृतम्। भारतीयगणितस्य भाषा संस्कृतम्। नाट्यशास्त्रस्य भाषा संस्कृतम्। भगवद्गीतायाः भाषा संस्कृतम्। प्राचीनभारतस्य शिल्पकृषि-रसायन-खगोल-पशुविज्ञान-अर्थशास्त्र-राजनीति-इत्यादि-विविध-शास्त्राणां भाषा संस्कृतम्। संस्कृतं विना प्राचीन-भारतम् अवगन्तुं न शक्यते एव।” तथा च –

“संस्कृतं केवलं भाषा न। तत् किञ्चन जीवनदर्शनम्। यच्च दर्शनं वदति – एकं सद् विप्रा बहुधा वदन्ति। यच्च दर्शनं वदति – आ नो भद्राः क्रतवो यन्तु विश्वतः। यच्च दर्शनं वदति – कृण्वन्तो विश्वमार्यम्। यच्च दर्शनं वदति – स्वदेशो भुवनत्रयम्। यच्च दर्शनं वदति – सङ्गच्छध्वं संवदध्वं सं वो मनांसि जानताम्।” इति।

भाषयाः विषयस्य च अन्योन्याश्रय सम्बन्धं प्रतिपादयन्ती सुषमास्वराजवर्या संस्कृतवाग्व्यवहारस्य आवश्यकतां विशदीकृतवती। भारतशासनेन सद्य आरब्धानां संस्कृतविकासविषयकयोजनानां परिचयमपि सा ददौ। ता यथा – वैदेशिकविदुषां कृते अध्येतृवृत्तियोजना, भारतीयसांस्कृतिकसम्बन्धपरिषदा दीयमानो विश्वसंस्कृतसम्मानः, विदेशमन्त्रालये च संस्कृतस्य कृते संयुक्तसचिवस्य नियुक्तिरित्याद्याः।

थाईदेशस्य राजकुमारी विदुषी महाचक्रीसिरिन्धौन् उद्घाटनसत्रं सम्बोधयन्ती संस्कृतवाङ्मये निहितान् आदर्शान् प्रत्यपीपदत्।

सम्मेलने अधोलिखितेषु सत्रेषु उपसत्रेषु च पञ्चदिनानि सततं ज्ञानधारा प्रवहमाणा आस्त, प्रायः षष्टिदेशेभ्यः समागतैः विद्वद्भिश्च स्वकीयाः शोधलेखाः प्रस्तुताः -

1. **वेदः** -- समन्वयकाः – भाग्यलतापाटस्कर-हैंसहैनरिखहोक्-श्रीकान्तबहुलकराः
2. **भाषाशास्त्रम्** - -- समन्वयकौ – टिझियानापौण्डिलो मोरेनो डोरे च
3. **योगः** - -- समन्वयकौ -- टी.एस्. रुक्मणी, ष्टुअर्ट् आर्. सर्बाकरश्च
4. **व्याकरणम्** -- समन्वयकौ -- जार्जकार्डोना, हिडिओ ओगावा च
5. **रामायणं महाभारतं च** -- समन्वयकौ जानब्राकिङ्टनः राजेन्द्रो नानावटी च
6. **पुराणानि** -- समन्वयकौ मक्-कामासटेलरः एलिझाबेथ-राल्मांश्च
7. **आगमास्तन्त्रं च** -- समन्वयकौ – राफेल् - तोरेल्ला जूडिथ्-तोरसोक् च
8. **आयुर्वेदः** -- समन्वयकः -- राजेशकोटेचा
9. **सूत्रं स्मृतिः शास्त्रं च** -- समन्वयकौ – शशिप्रभाकुमारः वैद्पाह्वा उमा च
10. **धर्मविमर्शः** -- विध्यनुष्ठानविमर्शः --- समन्वयकौ जैकाब्सन, वसुधानारायणश्च
11. **काव्यम् अलङ्कारश्च** -- समन्वयकाः – राधावल्लभः त्रिपाठी, जी. बोक्कली, सत्यनारायणचक्रवर्ती च
12. **वैज्ञानिकं वाङ्मयम्** --- समन्वयकौ -- रामसुब्रह्मण्यम् विजयपण्ड्या च
13. **बौद्धविद्या** -- समन्वयकौ -- असङ्गतिलकरत्ने अमरजीवलोचनश्च
14. **जैनविद्या** --- समन्वयकौ -- नलिनीबलवीरः पीटरफ्लुगेल् च
15. **संस्कृतग्रन्थानां सङ्क्रमणयात्रा** - -- समन्वयकः – क्रिष्टीना पेच्छिया
16. **वैष्णवमतं शैवमतं च** - -- समन्वयकौ बेटिना बाउमरः उल्टे हुस्केन् च
17. **वैदिकगणितम्** - -- समन्वयकः -- जेम्स-ग्लोवरः
18. **दर्शनानि, तत्त्वशास्त्रम्** -- समन्वयकौ अशोक-अकलूजकरः, गियानीपेलिग्रिनी च
19. **इतिहासः कलाः स्थापत्यम् अभिलेखशास्त्रं च** -- समन्वयकाः – जी. बूनेमनः नन्दनाचुटिवोङ् सिमोना सी. फरारो च

20. **संस्कृतं जनपदभाषाश्च --** समन्वयकौ -- सी.एस्. राधाकृष्णः हरिदत्तशर्मा च

21. **दक्षिणपूर्व-ऐशियायां संस्कृतम् --** समन्वयकाः -- अमरजीवलोचनः चिरापट्-प्रपण्डविद्यः ह्ला-तून् च

22. **संस्कृतशिक्षाशास्त्रम् --** समन्वयकः -- रामकरणशर्मा

23. **आधुनिकं संस्कृतसाहित्यम् --** समन्वयकौ -- पी.सी.मुरलीमाधवन् गोदावरीशमिश्रश्च

24. **संस्कृतं निज्ञानतान्त्रिकी च --** समन्वयकौ -- विनीतचैतन्यः अम्बाकुलकर्णी च

25. **हस्तलेखविज्ञानम् --** समन्वयकौ गयाचरणः त्रिपाठी, वेण्डी पी. रोड्रिग्युएज् च

26. **नाट्यशास्त्रस्य विविधा आयामाः --** समन्वयकः – राधावल्लभः त्रिपाठी

27. **संस्कृतम् दूरस्थशिक्षा च --** समन्वयकः-- रमाकान्तपाण्डेयः

28. **विशिष्टाद्वैतवेदान्तस्य विकासः --** समन्वयकौ -- एलिजडा फ्रेश्सी मार्कस् श्मुखेरश्च

29. **वैदिकस्रोःसु व्रात्यसंस्कृतिः --** समन्वयकौ - तिझियाना पौण्टिलो मोरेना डोरे च

30. **विविधानि**

अस्मिन् सम्मेलने एतेषु त्रिंशत्खण्डेषु विशिष्टचर्चासत्रेषु च प्रायः षट्शतं लेखाः प्रस्तुताः। संस्कृतविद्याया अनुद्घाटिताः पक्षा उन्मीलिताः। संस्कृतसंसारे सम्भावनानां पिहितानि द्वाराणि अनावृतानि।

समन्वयकाः स्वस्य स्वस्य सत्रस्य उपसत्रस्य वा सञ्चालनम् आध्यक्ष्यं च कृतवन्तः। साकल्येन सर्वेषु सत्रेषु उपसत्रेषु च प्रायः षष्टिशतं शोधपत्राणि प्रास्तूयन्त। भारताद् बहिः समायोजितेषु विश्वसंस्कृतसम्मेलनेषु इदं सम्मेलनं बृहत्तममभवत्। इतः पूर्वं देहल्यां 2012तमे वर्षे जेनुअरीमासे विज्ञानभवने समायोजिते पञ्चदशे विश्वसंस्कृतसम्मेलने द्विशतोत्तरसहस्रं विद्वासं सम्मिलिताः। तत् पञ्चदशं विश्वसंस्कृतसम्मेलनं विश्वस्मिन्नपि विश्वे बृहत्तमं संस्कृतसम्मेलनमिति स्मरणार्हम्।

षोडशो विश्वसंस्कृतसम्मेलने जूनमासस्य त्रिंशत्तमे दिवसे शास्त्रचर्चायां शब्दार्थसम्बन्धं प्रमाणमीमांसां चाधिकृत्य पण्डिताः संस्कृतेन विमर्शं विहितवन्तः। समापनदिने समायोजिते संस्कृतकविसम्मेलने त्रिंशत्प्रायः संस्कृतकवयः काव्यपाठं कृतवन्तः।

अस्मिन् विश्वसंस्कृतसम्मेलने समस्तं सांस्कृतं विश्वमेकनीडायितम्। संस्कृतकल्पलतिकायाः प्रसूनानां स्तबकैः विविधाः वर्णाः विविधाः सुगन्धाः विविधाश्च विच्छित्तीराविष्कृताः।

आधुनिकभौतिकीं सर्वथा वेदान्तदर्शनं बौद्धदर्शनं वा परामृशति पूर्वमानं वा विधत्ते वैज्ञानिकराद्धान्तानामिति सोदाहरणं विवेचनानि संस्कृतं विज्ञानं चेति शीर्षकान्वितस्य खण्डस्य शोधपत्रैः स्थापितम्। प्रतिपादनेषु नैकत्र ग्रीक-चीन-जापान-देशीयाः संस्कृतय उन्मीलिताः तासां अन्तःसम्बन्धाः भारतीयसंस्कृत्या साधिताः। हस्तलेखविज्ञानविषयके सत्रे अज्ञाताः हस्तलिखितग्रन्थाः सूचिताः। अतश्च च सम्मेलनेस्मिन् वेदादिविविधशास्त्राणां अपरामृष्टाः पक्षा उन्मीलिताः, नूतना अनुसन्धानदिशः समुद्घाटिताः पौरस्त्यपाश्चात्त्यविश्वयोर्मध्येपि संवादाय सेतुबन्धा विरचिताः।

अनन्तानि शास्त्राणि। अपारं वाग्वैभवम्। एतेषु पञ्चसु दिनेषु देवनगरस्था रिनेंसारक्षाप्रसङ्गपान्थशाला संस्कृतमयी समजायत, स्थविराणां प्रज्ञा चकास, यूनां विदुषाम् अधीतं तेजस्वि संवृत्तम्। विदेशेभ्य आगतानां यूनां संस्कृतपण्डितानां सारस्वतसाधना कीदृशी प्रगुणीभूतेति भारतीयैर्बोद्धव्यं शिक्षणीयं चाभूत्।

समापनसत्रे जुलाईमासस्य द्वितीये दिने समायोजिते राष्ट्रियसंस्कृतसंस्थानकुलपतिः पी.एन.शास्त्री आध्यक्ष्य निरवहत्। अस्मिन् सत्रे श्रीनिरुद्धदाशसम्पादितानां *न्यू कैटलागस्कैटलगोरम* इति ग्रन्थस्य सप्तत्रिंशत्तमात् ऊनचत्वारिंशत्तमं यावत् प्रकाशितानां खण्डानां लोकार्पणं समजायत। थाईदेशस्य वरिष्ठः संस्कृतविद्वान् चिरापटप्रपण्डविद्यः सभां समबोधयत्। अन्ताराष्ट्रियसंस्कृतसमवायस्य महासचिवो जयन्द्रः सोनी प्रतिवेजवं प्रास्तौत् 2018तमे वर्षे समायोज्यमानस्य सप्तदशविश्वसंस्कृतसम्मेलनस्य आयोजनं कनाडादेशे वैङ्कुवरविश्वविद्यालये भवितेति च समसूचयत्। अस्मिन्नवसरे मया राधावल्लभेन स्वसम्पादितायाः साहित्याकादेम्या प्रकाशिताया संस्कृतप्रतिभेति त्रैमासिक्याः नवीनस्य अङ्कस्य समर्पणं सम्मेलनसचिवाय समनियङ्ग्वर्याय कृतम्।

---------------000---------------